कश्च तन्द्रालस्यमेव च । वस्तिविसर्गविलया दोषाणामप्रवर्त्तनम् । लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं सुखम् । यच्च सुष्ठु गुरुत्वञ्च गात्राणां बहुमूत्रता । न विजीर्णा न वा ग्लानिर्ज्वरस्यामस्य लक्षणम् । क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम् । दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् । यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा । शिरोऽर्त्तिमूर्च्छावमिदेहदाहकण्ठास्यशोषारुचिपर्व्वभेदाः । उन्निद्रता सम्भ्रमरोमहर्षा जृम्भातिवाक्त्वं पवनात् स पित्तात् । तापहान्यरुचिपर्व्वशिरोरुक् पीनसश्वसनकासविबन्धाः । शीतजाड्यतिमिरभ्रमितन्द्राः श्लेष्मवातजनितज्वरलिङ्गम् । शीतस्तम्भस्वेददाहव्यवस्था तृष्णाकासः श्लेष्मपित्तप्रवृत्तिः । मोहस्तन्द्रालिप्ततिक्तास्यता च ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य । सर्व्वजो लक्षणैः सर्व्वैर्दाहोऽत्र च मुहुर्मुहुः । तद्वच्छीतं महानिद्रा दिवा जागरणं निशि । सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा । गीतनर्त्तनहास्यादिप्रकृतेहाप्रवर्त्तनम् । साश्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी । अक्षिणी पिण्डिका पार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः । सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा । परिदग्धा खरा जिह्वा गुरुस्रस्ताङ्गसन्निभा । रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट् । कीटानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् । हृद्व्यथा मलसंसर्गः प्रवृत्तिरल्पशोऽति वा । स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता । दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् । सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् । वायुना कफरुद्धेन पित्तमन्तः सुपीडितम् । व्यवायित्वाच्च सौक्ष्म्याच्च बहिर्म्मार्गं प्रपद्यते । तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे । दोषे विबद्धे नष्टेऽग्नौ सर्व्वसंपूर्णलक्षणः । असाध्यः सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा । अन्यश्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् । त्वचि कोष्ठे च वा दाहं विदधाति पुरोऽनु वा । तद्वद्वातकफौ शीतं दाहादिर्दुस्तरस्तयोः । शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते । शीते शान्तेऽम्लको मूर्च्छा मदस्तृष्णा च जायते । दाहादौ पुनरन्ते स्युस्तन्द्रास्वेदवमिक्लमाः । आगन्तुरभिघाताभिषङ्गशापाभिचारतः । चतुर्द्धा तु क्षतच्छेदो दाहाद्यैरभिघातजः । श्रमाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् । सव्यथाशोकवैवर्ण्यं सरुजं कुरुते ज्वरम् । ग्रहावेशौषधिविषक्रोधभीशोककामजः । अभिषङ्गाद् ग्रहेणास्मिन्नकस्मात् हासरोदने । औषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः । विषात् मूर्च्छातिसारास्यश्यावता दाहतृड्भ्रमः । क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे । कामाद्भ्रमोऽरुचिर्द्दाहो ह्रीनिद्राधीधृतिक्षयः । ग्रहादौ सन्निपातस्य रूपादौ मरुतस्तयोः । कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ । सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ । तत्राभिचारिकैर्म्मन्त्रैर्हूयमानस्य तप्यते । पूर्व्वञ्चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः । सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः । इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः । शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्व्वहिराश्रयः । प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः । पूर्व्वं शरीरे शारीरे तापो मनसि मानसे । पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् । दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः । ज्वरोऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः । वहिरेव वहिर्व्वेगे तापोऽपि च सुसाधितः । वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् । वैकृतोऽन्यः स दुःसाध्यः प्रायश्च प्राकृतोऽनिलात् । वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् । कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः । तत् प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् । कफो वसन्ते तमपि वातपित्तं भवेदनु । बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः । सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः । ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता । न प्रवृत्तिर्न विजीर्णा न क्षुत् सामज्वराकृतिः । ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः । मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् । जीर्णतामविपर्य्यासात् सप्तरात्रञ्च लङ्घनात् । ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् । प्रायशः सन्निपातेन भूयसाऽप्युपदिश्यते । सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ । धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः । तापयन्तस्तनूं सर्व्वां तुल्यदृष्यादिवर्द्धिताः । बलिनो गुरवस्तद्वद्विशेषेण रसान्विताः । सततं निष्प्रतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् । मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत्ततः । सर्व्वाकाररसादीनां शुद्ध्याऽशुद्ध्यापि वा क्रमात् । वातपित्तकफैः सप्तदशद्वादशवासरान् । प्रायोऽनुयाति मर्य्यादां मोक्षाय च बधाय च । इत्यग्निवेशस्य मतं